## शमामष्टानां दीर्घः श्यनि । (७४/२५१९)

शमादीनामष्टानां[1] दीर्घो भवति श्यनि परतः। शम्–शाम्यति। तम् – ताम्यति। दम् – दाम्यति। [2]श्रम् – श्राम्यति। [3]क्षम् – क्षाम्यति। [4]क्लम् – क्लाम्यति। मदी – माद्यति। अष्टानाम् इति किम्? अस्यति[5]। श्यनि इति किम्? भ्रमति। [6]वा भ्राश (३.१.७०/२३२१) इति श्यनो विकल्पः। बभ्राम॥

## ष्ठिवुक्लम्याचमां शिति। (७५/२३२०)

ष्ठिवु क्लमि आचम् इत्येतेषां [7]दीर्घो भवति शिति परतः। [8]ष्ठीवति। क्लमु – क्लामति। आचम्– आचामति। क्लमिग्रहणं शबर्थम्। चमेराङ्पूर्वस्य ग्रहणम्। इह मा भूत्, [9]चमति। विचमति॥

## क्रमः परस्मैपदेषु। (७६/२३२२)

क्रमः [10]परस्मैपदपरे शिति परतो दीर्घो भवति। क्रामति,[11] क्रामतः, क्रामन्ति। परस्मैपदेषु इति किम्? [12]आक्रमते आदित्यः। इह उत्क्राम, सङ्क्राम इति हेर्लुकि कृते 'न लुमताङ्गस्य' (१.१.६६/२६३) इति प्रत्ययलक्षणप्रतिषेधात् [13]दीर्घो न प्राप्नोति? नैष दोषः। लुमता[14]शब्देन लुप्ते यदङ्गं तस्य कार्ये [15]स प्रतिषेधः। न च हौ क्रमिरङ्गम्, किं तर्हि, शपि॥

## इषुगमियमां छः। (७७/२४००)

इषु गमि यम इत्येतेषां[16] शिति परतः छकारादेशो भवति। इच्छति। गच्छति। [17]यच्छति। इषेरुदितो ग्रहणम्। इह मा भूत्, इष्यति, इष्णाति इति। ये तु इषिमुदितं नाधीयते ते इह च सूत्रे अचि इति अनुवर्तयन्ति। तच्च प्रधानमज्ग्रहणं शिति इत्यनेन विशेष्यते इति वर्णयन्ति। तथा च सति तदादिविधिर्न भवति। 'यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या. प. १२७) इत्येतदपि[18] विशेषणेनैव इष्यते, तेन इषाण इत्यत्र छत्वं न भवति। न ह्ययमजेव शित् इति॥

## पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। (७८/२३६०)

पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्ति शद सद इत्येतेषां[19] पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद इत्येते आदेशा भवन्ति[20] शिति परतः। पा – पिबति। घ्रा – जिघ्रति। ध्मा – धमति। स्था – तिष्ठति। म्ना – मनति। दाण् – यच्छति। दृशि – पश्यति। अर्ति – ऋच्छति। सर्ति – धावति। शद – शीयते। सद–सीदति। पिबतेर्लघूपधगुणः प्राप्नोति, सः 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (व्या. प. ३८)

---

1. धातूनाम् इत्यधिकम् ह. 2. यमु – याम्यति क. 3. क्षमु ब. 4. क्लमु ब. 5. यस्यति इत्यधिकम् क. 6. वा – बभ्राम नास्ति क. 7. अङ्गानाम् इत्यधिकम् क. 8. ष्ठीव्यति क. 9. उच्चमति ह. 10. परस्मैपदे इ. 11. क्रामन् इत्यधिकम् इ. 12. आक्रमाणः सूर्यः चन्द्रमाः क. 13. दीर्घत्वं भवति क. 14. शब्देन नास्ति इ. क. 15. सः नास्ति क, सति इत्यधिकम् इ. 16. अङ्गानाम् इत्यधिकम् क. 17. यच्छति नास्ति ब. 18. हि इत्यधिकम् ब. 19. अङ्गानाम् इत्यधिकम् क. ह. 20. यथासङ्ख्यम् इत्यधिकम् क. ह.